**दिनाङ्क:- 09.06.2024**
**प्रात:- 06:55**

## अथवार्ता:

### प्रधानमन्त्री - प्रतिज्ञा ग्रहण समारोह:

केन्द्रीय नवीन प्रशासनस्य अद्य भावमानस्य प्रतिज्ञा ग्रहण समारोहस्य सज्जता सम्पन्ना जाता । राष्ट्रपतिः द्रौपदी मुर्मूः एन.डी.ए. संसद् दलस्य नेतारं नरेन्द्र मोदिनं नवीन प्रशासनस्य निर्माणाय आमन्त्रितवती। शपथ ग्रहण समारोह: अघ सायं पञ्चदशकलोत्तर- सप्तवादने राष्ट्रपति भवनस्य प्रांगणे भविता ।

राष्ट्रपतिः द्रौपदी मुर्मू: श्री नरेन्द्र मोदिनं तस्य मन्त्रि-परिषद् सदस्यान् च पदस्य गोपनीयतायाश्य शपथं ज्ञापयिष्यति। श्रीमोदी परह्यः राष्ट्रपतिना सह मेलन कृत्वा नवीन प्रशासन-निर्माणस्य च प्रस्तावं प्रस्तुतवान् ।

राष्ट्रपति-भवनात् बहि: मोदी न्यगदत् यत् राष्ट्रिय - जनतान्त्रिक गठबंधन –इति दलं सुदृढं स्थिरं विकासोन्मुखं च प्रशासनं निर्मास्यति। श्रीमोदिना राष्ट्रिय – उक्तं यत् जनाः राष्ट्रिय – जनतान्त्रिक गठबन्धनमित्यस्मै एकं अवसरं दत्तवन्तः, अपि च एतत् अष्टादशम- लोकसभा नवीनानां यूनां च ऊर्जाया: स्रोतः अस्ति। विदेश मंत्रालयेन सूचितं यत् श्रीलंकाया : राष्ट्रपतिः शनिल-

विक्रमसिंघे, मालदीवस्य राष्ट्रपतिः डॉ. मोहम्मद - मुइज्जुः, सेशेल्सस्य उप राष्ट्रपतिः अहमद अफीफः, बांग्ला- देशस्य प्रधानमंत्री शेख हसीना, मॉरिशस् देशस्य प्रधानमंत्री, प्रविन्द कुमार जुगनौथः , नेपालस्य प्रधानमन्त्री पुष्प कमल दहल: 'प्रचण्ड' भूटानस्य च शेरिंग तोन्गे इमे सर्वेऽपि समारोहे भागं ग्रहीष्यन्ति। एते नेतारः अस्माकं संवाददातृभिः सूचित् यत श्री नरेन्द्र मोदी अनवरतं तृतीयं वारं प्रधानमन्त्री पदस्य शपथ ग्रहण - समारोहे भागं ग्रहीतुं निकटवर्तिनां देशानां विभिन्नाः नेतारः आमन्त्रिता:।

### कांग्रेस

कांग्रेसदलस्य वरिष्ठा नेतृ सोनिया गांधी सर्वसम्मत्या कांग्रेस संसदीय दलस्य अध्यक्षत्वेन चिता । दलस्यास्य नेता राजीव शुक्लः ह्यः नवदिल्ल्यां अवोचत् यत् श्रीमती गांधिना पदोऽयं स्वीकृत : । निर्णयोऽयं कांग्रेसदलस्य कार्य समितेः उपवेशने स्वीकृत :।

### ऋतु विज्ञान

भारतीय ऋतुविज्ञान विभागेन पश्चिमोत्तर भारते आद्यरभ्य ऊषणतरंग प्रवाहः सम्भावितः। विबागेन संसूचिंत यत् अग्रिमेषु पंचदिवसेषु मध्य-पूर्व भारत-उत्तर प्रदेश- उत्तर-पूर्व मध्य प्रदेश राज्येषु भीषण उष्णता भविष्यति। ऋतुविज्ञान विभागस्य वैज्ञानिकः डॉ आर के जेनामणिना आकाशवाण्याः वार्ताहरान् संसूचितं यत् अग्रिमेषु त्रि दिवसेषु मध्य महाराष्ट्र सहितं देशस्य दक्षिण क्षेत्रेषु वृष्टिः सम्भाव्यते।

**इजरायल**

संयुक्तराष्ट्रसङ्घः सशस्त्र संघर्षावधौ बालानां विरुध्य अपराधं कुर्वतां देशानां संस्थानां च वार्षिक "लज्जासूचौ" "list of shame" इत्यस्मिन् इजरायल- हमास देशयोः समावेशं अकरोत् । इजराइल हमास – देशयोः अस्मिन् सोचौ प्रथमवारं समावेशः जातः । रूस, इस्लामिकदेशा: अलकायदा, बोको हरम, अफगानिस्तान, इराक, म्यांमार सोमालिया, यमन, सीरिया इत्यादयः देशाः पूर्वमेव अस्मिन् सूचौ समाविष्टाः सन्ति।

इजरायल प्रथमःलोकतान्त्रिकः देश: वर्तते य: अस्मिन् सूचौ समाविष्टः। अस्मिन् निर्णये प्रधानमन्त्री बेन्जामिन नेतन्याहू इत्यनेन तीक्ष्ण प्रतिक्रिया प्रकटिता । सः अब्रवीत् यत् इजरायलस्य सैन्यदलः विश्वस्य उत्तमः सैन्यदलेषु वर्तते संयुक्त राष्ट्रसङ्घस्य निर्णयः तथ्योऽयं परिवर्तयितुं न अर्हति ।

**फ्रेंच-ओपन-टूर्नामेंट**

फ्रेंच ओपन-टूर्नामेंट - स्पर्धा-श्रृङ्खलायां महिलैकान्त्यचक्रे पोलैण्डस्य स्वियातेकः अनुक्रमं तृतीयवारं विजितवती । महिलैकान्त्यक्रे शीर्ष- वरीयता प्राप्ता स्वियातेकः इटलीदेशस्य जैस्मीन पाओलिनीं अनवरत षद-द्वि, षट्- एकम् इति अंकांतलारेन पराजितवती।

**।। इति वार्ताः।।**